श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# શ્રી મદ્ભાગવત રસિક કુટુંબ

## UG-11.8 - પ્રથમ સોપાન



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**પ્રાર્થના**

**નારાયણં(ન્) નમસ્કૃત્ય, નરં(ઞ્) ચૈવ નરોત્તમમ્.**
**દેવીં(મ્) સરસ્વતીં(મ્) વ્યાસં(ન્), તતો જયમુદીરયેત્.**

**નામસઙ્કીર્તનં(મ્) યસ્ય, સર્વપાપપ્રણાશનમ્.**
**પ્રણામો દુઃખશમનસ્, તં(ન્) નમામિ હરિં(મ્) પરમ્.**

**શ્રીમદ્ભાગવતમહાપુરાણમ્**
**એકાદશઃ સ્કંધઃ**
**અથાષ્ટમોऽધ્યાયઃ**

### બ્રાહ્મણ ઉવાચ

**સુખમૈન્દ્રિયકં(મ્) રાજન્, સ્વર્ગે નરક એવ ચ .**
**દેહિનાં(મ્) યદ્ યથા દુઃખં(ન્), તસ્માન્નેચ્છેત તદ્ બુધઃ .. ૧..**
સુખમૈન્ + દ્રિયકં(મ્), તસ્માન્ + નેચ્છેત

**ગ્રાસં(મ્) સુમૃષ્ટં(મ્) વિરસં(મ્), મહાન્તં(મ્) સ્તોકમેવ વા .**
**યદૃચ્છયૈવાપતિતં(ઙ્), ગ્રસેદાજગરોऽક્રિયઃ .. ૨..**
યદૃચ્ + છયૈવા + પતિતં(ઙ્), ગ્રસેદા + જગરોऽ + ક્રિયઃ

**શયીતાહાનિ ભૂરીણિ, નિરાહારોઽનુપક્રમઃ .**

**યદિ નોપનયેદ્ ગ્રાસો, મહાહિરિવ દિષ્ટભુક્ .. ૩..**

નિરાહારોઽ + નુપક્રમઃ , મહા + હિરિવ

**ઓજઃ(સ્) સહોબલયુતં(મ્) બિભ્રદ્ દેહમકર્મકમ્ .**

**શયાનો વીતનિદ્રશ્ચ, નેહેતેન્દ્રિયવાનપિ .. ૪..**

દેહ + મકર્મકમ્, નેહેતેન્દ્રિ + યવાનપિ

**મુનિઃ(ફ્) પ્રસન્નગમ્ભીરો, દુર્વિગાહ્યો દુરત્યયઃ .**

**અનન્તપારો હ્યક્ષોભ્યઃ(સ્) સ્તિમિતોદ ઇવાર્ણવઃ .. ૫..**

દુર્ + વિગાહ્યો, સ્તિમિ + તોદ

**સમૃદ્ધકામો હીનો વા, નારાયણપરો મુનિઃ .**

**નોત્સર્પેત ન શુષ્યેત, સરિદ્ભિરિવ સાગરઃ .. ૬..**

સમૃદ્ + ધકામો, સરિદ્ + ભિરિવ

**દૃષ્ટ્વા સ્ત્રિયં(ન્) દેવમાયાં(ન્), તદ્ભાવૈરજિતેન્દ્રિયઃ .**

**પ્રલોભિતઃ(ફ્) પતત્યન્ધે, તમસ્યગ્નૌ પતં(ઙ્)ગવત્ .. ૭..**

તદ્ + ભાવૈ + રજિતેન્દ્રિયઃ

**યોષિદ્ધિરણ્યાભરણામ્બરાદિ-**

**દ્રવ્યેષુ માયારચિતેષુ મૂઢઃ .**

**પ્રલોભિતાત્મા હ્યુપભોગબુદ્ધ્યા**

**પતં(ઙ્)ગવન્નશ્યતિ નષ્ટદૃષ્ટિઃ .. ૮..**

યોષિદ્ + ધિરણ્યા + ભરણામ્ + બરાદિ ,

માયા + રચિતેષુ

હ્યુપ + ભોગ + બુદ્ધ્યા,

પતં(ઙ્) + ગવન્ + નશ્યતિ

**સ્તોકં(મ્) સ્તોકં(ઙ્) ગ્રસેદ્ ગ્રાસં(ન્), દેહો વર્તેત યાવતા .**

**ગૃહાનહિં(વ્) સન્નાતિષ્ઠેદ્, વૃત્તિં(મ્) માધુકરીં(મ્) મુનિઃ .. ૯..**

ગૃહા + નહિં(વ્)સન્ + નાતિષ્ઠેદ્

અણુભ્યશ્ચ મહદ્ભ્યશ્ચ, શાસ્ત્રેભ્યઃ(ખ્) કુશલો નરઃ .
સર્વતઃ(સ્) સારમાદદ્યાત્, પુષ્પેભ્ય ઇવ ષટ્પદઃ .. ૧૦..

અણુભ્ય + શ્ચ , મહદ્ + ભ્યશ્ચ , સારમા + દદ્યાત્

સાયન્તનં(મ્) શ્વસ્તનં(મ્) વા, ન સં(ઙ્) ગૃહ્ણીત ભિક્ષિતમ્ .
પાણિપાત્રોદરામત્રો, મક્ષિકેવ ન સઙ્ગ્રહી .. ૧૧..

શ્વસ્ + તનં(મ્) પાણિ + પાત્રો + દરામત્રો

સાયન્તનં(મ્) શ્વસ્તનં(મ્) વા, ન સં(ઙ્) ગૃહ્ણીત ભિક્ષુકઃ .
મક્ષિકા ઇવ સં(ઙ્)ગૃહ્ણન્, સહ તેન વિનશ્યતિ .. ૧૨..

સં(ઙ્)ગૃહ્ + ણીત

પદાપિ યુવતીં(મ્) ભિક્ષુર્ન, સ્પૃશેદ્ દારવીમપિ .
સ્પૃશન્ કરીવ બધ્યેત, કરિણ્યા અં(ઙ્)ગસં(ઙ્)ગતઃ .. ૧૩..

દા + રવી + મપિ, અં(ઙ્)ગ + સં(ઙ્)ગતઃ

નાધિગચ્છેત્ સ્ત્રિયં(મ્) પ્રાજ્ઞઃ(ખ્), કર્હિચિન્મૃત્યુમાત્મનઃ .
બલાધિકૈઃ(સ્) સ હન્યેત, ગજૈરન્યૈર્ગજો યથા .. ૧૪..

કર્હિચિન્ + મૃત્યુ +માત્મનઃ

ગજૈ+ રન્યૈર્ + ગજો

ન દેયં(ન્) નોપભોગ્યં(ગ્) ચ્ લુબ્ધૈર્યદ્ દુઃખસં(ગ્)ચિતમ્ .
ભુઙ્ક્તે તદપિ તચ્ચાન્યો, મધુહેવાર્થવિન્મધુ .. ૧૫..

નો + પભોગ્યં(ગ્), મધુ + હેવાર્થ + વિન્મધુ

સુદુઃખોપાર્જિતૈર્વિત્તૈ-રાશાસાનાં(ઙ્) ગૃહાશિષઃ .
મધુહેવાગ્રતો ભુઙ્ક્તે, યતિર્વૈ ગૃહમેધિનામ્ .. ૧૬..

સુદુઃખો + પાર્ + જિતૈર્ + વિત્તૈ, મધુહેવા + ગ્રતો

ગ્રામ્યગીતં(ન્) ન શૃણુયાદ્, યતિર્વનચરઃ(ખ્) ક્વચિત્ .
શિક્ષેત હરિણાદ્ બદ્ધાન્- મૃગયોર્ગીતમોહિતાત્ .. ૧૭..

યતિર્ + વનચરઃ(ખ્),મૃગયોર્ + ગીત + મોહિતાત્

નૃત્યવાદિત્રગીતાનિ, જુષન્ ગ્રામ્યાણિ યોષિતામ્ .
આસાં(ઙ્) ક્રીડનકો વશ્ય, ઋષ્યશૃઙ્ગો મૃગીસુતઃ .. ૧૮..

નૃત્ય + વાદિત્ર + ગીતાનિ,ઋષ્ય + શૃઙ્ગો

જિહ્વયાતિપ્રમાથિન્યા, જનો રસવિમોહિતઃ .
મૃત્યુમૃચ્છત્યસદ્બુદ્ધિર્- મીનસ્તુ બડિશૈર્યથા .. ૧૯..

જિહ્વયા + તિપ્રમા + થિન્યા,

મૃત્યુ + મૃચ્છત્ય + સદ્બુદ્ધિર્ ,બડિશૈર્ + યથા

ઇન્દ્રિયાણિ જયન્ત્યાશુ, નિરાહારા મનીષિણઃ .
વર્જયિત્વા તુ રસનં(ન્) તન્નિરન્નસ્ય વર્ધતે .. ૨૦..

જયન્ + ત્યાશુ , તન્નિ + રન્નસ્ય

તાવજ્જિતેન્દ્રિયો ન સ્યાદ્, વિજિતાન્યેન્દ્રિયઃ(ફ્) પુમાન્ .
ન જયેદ્ રસનં(મ્) યાવજ્- જિતં(મ્) સર્વં(ગ્) જિતે રસે .. ૨૧..

તાવજ્ + જિતેન્દ્રિયો, વિજિતાન્ + યેન્દ્રિયઃ(ફ્)

પિં(ઙ્)ગલા નામ વેશ્યાઽઽસીદ્, વિદેહનગરે પુરા .
તસ્યા મે શિક્ષિતં(ઙ્) કિં(ગ્) ચિન્-નિબોધ નૃપનન્દન .. ૨૨..

સા સ્વૈરિણ્યેકદા કાન્તં(મ્), સં(ઙ્)કેત ઉપનેષ્યતી .
અભૂત્ કાલે બહિર્દ્વારિ, બિભ્રતી રૂપમુત્તમમ્ .. ૨૩..

સ્વૈ + રિણ્યે + કદા , રૂ + પમુત્ + તમમ્

માર્ગ આગચ્છતો વીક્ષ્ય, પુરુષાન્ પુરુષર્ષભ .
તાઞ્છુલ્કદાન્ વિત્તવતઃ(ખ્), કાન્તાન્ મેનેઽર્થકામુકા .. ૨૪..

પુરુષર્ + ષભ,તાઞ્ + છુલ્ક + દાન્ ,

વિત્ + તવતઃ(ખ્) ,મેનેઽર્થ + કામુકા

આગતેષ્વપયાતેષુ, સા સં(ઙ્) કેતોપજીવિની .
અપ્યન્યો વિત્તવાન્ કોઽપિ, મામુપૈષ્યતિ ભૂરિદઃ .. ૨૫..

આગતેષ્વ + પયાતેષુ , સ(ઙ્)કે + તોપ + જીવિની, મામુ + પૈષ્યતિ

એવં(ન્) દુરાશયા ધ્વસ્ત-નિદ્રા દ્વાર્યવલમ્બતી .
નિર્ગચ્છન્તી પ્રવિશતી નિશીથં(મ્) સમપદ્યત .. ૨૬..

દ્વાર્ + યવ + લમ્બતી , નિર્ + ગચ્છન્તી

તસ્યા વિત્તાશયા શુષ્યદ્- વક્ત્રાયા દીનચેતસઃ .
નિર્વેદઃ(ફ્) પરમો જજ્ઞે, ચિન્તાહેતુઃ(સ્) સુખાવહઃ .. ૨૭..

વિત્ + તાશયા

તસ્યા નિર્વિણ્ણચિત્તાયા, ગીતં(મ્) શૃણુ યથા મમ .
નિર્વેદ આશાપાશાનાં(મ્) પુરુષસ્ય યથા હ્યસિઃ .. ૨૮..

નિર્વિણ્ણ + ચિત્તાયા

ન હ્યં(ઙ્) ગાજ્જાતનિર્વેદો, દેહબન્ધં(ઞ્) જિહાસતિ .
યથા વિજ્ઞાનરહિતો, મનુજો મમતાં(ન્) નૃપ .. ૨૯..

હ્યં(ઙ્)ગાજ્ + જાત + નિર્વેદો,

પિં(ઙ્)ગલોવાચ

અહો મે મોહવિતતિં(મ્), પશ્યતાવિજિતાત્મનઃ .
યા કાન્તાદસતઃ(ખ્) કામં(ઙ્), કામયે યેન બાલિશા .. ૩૦..

પશ્યતા + વિજિતાત્મનઃ ,કાન્તા + દસતઃ(ખ્)

સન્તં(મ્) સમીપે રમણં(મ્) રતિપ્રદં(મ),
વિત્તપ્રદં(ન્) નિત્યમિમં(મ્) વિહાય .
અકામદં(ન્) દુઃખભયાધિશોક-
મોહપ્રદં(ન્) તુચ્છમહં(મ્) ભજેઽજ્ઞા .. ૩૧..

દુઃખ + ભયા+ ધિશોક

અહો મયાઽઽત્મા પરિતાપિતો વૃથા,
સાં(ઙ્) કેત્યવૃત્ત્યાતિવિગર્હ્યવાર્તયા .
સ્ત્રૈણાન્નરાદ્ યાર્થતૃષોઽનુશોચ્યાત્
ક્રીતેન વિત્તં(મ્) રતિમાત્મનેચ્છતી .. ૩૨..

સાં(ઙ)કેત્ય + વૃત્યા + તિવિગર્ + હ્યવાર્તયા, સ્ત્રૈણાન્ + નરાદ્

યાર્થ + તૃષોઽ + નુશોચ્યાત્ , રતિ + માત્મ + નેચ્છતી

**યદસ્થિભિર્નિર્મિતવં(વ્) શવં(વ્)શ્ય-**

**સ્થૂણં(ન્) ત્વચા રોમનખૈઃ(ફ્) પિનદ્ધમ્ .**

**ક્ષરન્નવદ્વારમગારમેતદ્**

**વિણ્મૂત્રપૂર્ણં(મ્) મદુપૈતિ કાન્યા .. ૩૩..**

યદસ્થિભિર્ + નિર્મિત + વં(વ્)શ + વં(વ્)શ્ય, પિનદ્ + ધમ્

ક્ષરન્ + નવદ્વા + રમગા + રમેતદ્ , વિણ્ + મૂત્ર + પૂર્ણં(મ્)

**વિદેહાનાં(મ્) પુરે હ્યસ્મિન્- નહમેકૈવ મૂઢધીઃ .**

**યાન્યમિચ્છન્ત્યસત્યસ્મા-દાત્મદાત્ કામમચ્યુતાત્ .. ૩૪..**

યાન્ય + મિચ્છન્ત્ય + સત્યસ્મા, કા + મમચ્ + યુતાત્

**સુહૃત્ પ્રેષ્ઠતમો નાથ, આત્મા ચાયં(મ્) શરીરિણામ્ .**

**તં(મ્) વિક્રીયાત્મનૈવાહં(મ્) રમેઽનેન યથા રમા .. ૩૫..**

વિક્રી + યાત્મ + નૈવાહં(મ્)

**કિયત્ પ્રિયં(ન્) તે વ્યભજન્, કામા યે કામદા નરાઃ .**

**આદ્યન્તવન્તો ભાર્યાયા, દેવા વા કાલવિદ્રુતાઃ .. ૩૬..**

આદ્યન્ + તવન્તો

**નૂનં(મ્) મે ભગવાન્ પ્રીતો, વિષ્ણુઃ(ખ્) કેનાપિ કર્મણા .**

**નિર્વેદોઽયં(ન્) દુરાશાયા, યન્મે જાતઃ(સ્) સુખાવહઃ .. ૩૭..**

**મૈવં(મ્) સ્યુર્મન્દભાગ્યાયાઃ(ખ્), ક્લેશા નિર્વેદહેતવઃ .**

**યેનાનુબન્ધં(ન્) નિર્હૃત્ય, પુરુષઃ(શ્) શમમૃચ્છતિ .. ૩૮..**

સ્યુર્ + મન્દ + ભાગ્યાયાઃ(ખ્),નિર્વેદ + હેતવઃ, યેના + નુબન્ધં(ન્)

**તેનોપકૃતમાદાય, શિરસા ગ્રામ્યસં(ઙ્)ગતાઃ .**

**ત્યક્ત્વા દુરાશાઃ(શ્) શરણં(મ્) વ્રજામિ તમધીશ્વરમ્ .. ૩૯..**

તેનો + પકૃત + માદાય

સન્તુષ્ટા શ્રદ્દધત્યેત-દ્યથા લાભેન જીવતી .
વિહરામ્યમુનૈવાહ-માત્મના રમણેન વૈ .. ૪૦..

શ્રદ્ + દધત્યેત, દ્યથાલા + ભેન ,વિહરામ્ય + મુનૈ + વાહ

સં(વ્)સારકૂપે પતિતં(મ્), વિષયૈર્મુષિતેક્ષણમ્ .
ગ્રસ્તં(ઙ્) કાલાહિનાઽઽત્માનં(ઙ્) કોઽન્યસ્ત્રાતુમધીશ્વરઃ .. ૪૧..

વિષયૈર્ + મુષિ + તેક્ષણમ્ , કાલા + હિનાઽઽત્ + માનં(ઙ્) ,

કોઽન્યસ્ + ત્રાતુમ + ધીશ્વરઃ

આત્મૈવ હ્યાત્મનો ગોપ્તા, નિર્વિદ્યેત યદાખિલાત્ .
અપ્રમત્ત ઇદં(મ્) પશ્યેદ્, ગ્રસ્તં(ઙ્) કાલાહિના જગત્ .. ૪૨..

નિર્ + વિદ્યેત

બ્રાહ્મણ ઉવાચ

એવં(મ્) વ્યવસિતમતિર્-દુરાશાં(ઙ્) કાન્તતર્ષજામ્ .
છિત્ત્વોપશમમાસ્થાય, શય્યામુપવિવેશ સા .. ૪૩..

વ્યવસિ + તમતિર્ , કાન્ + તતર્ + ષજામ્

છિત્ત્વો+ પશ + મમાસ્થાય ,શય્યા+ મુપ+ વિવેશ

આશા હિ પરમં(ન્) દુઃખં(ન્), નૈરાશ્યં(મ્) પરમં સુખમ્ .
યથા સઞ્છિદ્ય કાન્તાશાં(મ્) સુખં(મ્) સુષ્વાપ પિં(ઙ્)ગલા .. ૪૪..

ઇતિ શ્રીમદ્ભાગવતે મહાપુરાણે પારમહંસ્યાં
સંહિતાયામેકાદશસ્કન્ધેઽષ્ટમોઽધ્યાયઃ .. ૮..

ૐ પૂર્ણમદઃ(ફ્) પૂર્ણમિદં(મ્) પૂર્ણાત્પૂર્ણમુદચ્યતે
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે.
ૐ શાન્તિઃ(શ્) શાન્તિઃ(શ્) શાન્તિઃ